शास्त्री-III

12.09.20
3

चतुर्थस्थानस्थितानां सर्वग्रहाणां फलान्याह —

स्वल्पं पयः स्रवति सूर्यसुते चतुर्थे
दौर्भाग्यमुष्णकिरणः कुरुते शशी च।
राहुः सपत्नमपि च क्षितिजोऽल्पवित्तं
दद्याद्भृगुः सुरगुरुश्च बुधश्च सौख्यम्॥

जिसके विवाहकाल में लग्न से चतुर्थ स्थान में शनि हो, उसके स्तनों से बहुत थोड़ा दूध निकलता है। सूर्य या चन्द्र हो तो भाग्यरहित, राहु हो तो सौत वाली, मंगल हो तो अल्प धन वाली तथा शुक्र, बृहस्पति या बुध हो तो सुख भोगने वाली स्त्री होती है।

चतुर्थे चतुर्थस्थाने। सूर्यसुते शनैश्चरे। स्वल्पं स्तोकम्। पयः क्षीरं स्रवति। उष्णकिरणः सूर्यो दौर्भाग्यं दुर्भगात्वं कुरुते। शशी च चन्द्रो दौर्भाग्यमेव कुरुते। राहुः सपत्नं शत्रुं करोति। सापत्न्यं करोतीत्यर्थः। क्षितिजोऽङ्गारकोऽल्पवित्तं स्वल्पधनं करोति। भृगुः शुक्रः। सुरगुरुर्जीवः। बुधश्च। सौख्यं दद्यात्।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।

शास्त्री-III

12.04.20
4

पञ्चमस्थानस्थितानां सर्वग्रहाणां फलान्याह —

नवटात्मजौ रविकुजौ खलु पञ्चमस्थे
चन्द्रात्मजो बहुसुतां गुरुभार्गवौ च।
राहुर्ददाति मरणं शनिरुग्ररोगं
कन्याविनाशमचिरात् कुरुते शशाङ्कः ॥

जिसके विवाहकाल में लग्न से पञ्चम स्थान में रवि या मंगल हो तो उसकी सन्तान मर जाती है। बुध, गुरु और शुक्र हो तो बहुत सन्तान, राहु हो तो मृत्यु, शनि हो तो कठोर रोग तथा चन्द्र हो तो शीघ्र ही कन्या का नाश करता है।

रविरादित्यः। कुजोऽङ्गारकः। एतौ पञ्चमस्थौ लग्नात् पञ्चमस्थाने स्थितौ नवटात्मजां मृतापत्यां कन्यकां कुरुतः। खलुशब्द आगमद्योतनार्थः। चन्द्रात्मजो बुधो बहुसुतां प्रभूतपुत्रां करोति। गुरुर्बृहस्पतिः। भार्गवः शुक्रः। एतावपि चशब्दाद् बहुसुतामेव कुरुतः। राहुर्मरणं ददाति। शनिः सौरिः। उग्रं तीव्रं रोगं गदं ददाति। शशाङ्कश्चन्द्रोऽचिरात् शीघ्रमेव कन्याया विनाशं कुरुते करोति।

डॉ० सुदिवट कुमार
सह० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

12.09.20
2

क्षेमङ्करी — मीन लग्न के जातकों के लिए शनि, शुक्र, सूर्य और बुध अशुभग्रह हैं। मंगल और चन्द्रमा शुभ ग्रह हैं। मंगल और गुरु योगकारक हैं। मारक भी मंगल मारक नहीं होता। अशुभ शनि और बुध मारक लक्षण-लक्षित होने से मारक होते हैं।

लग्नाद्मारकादिविचारोपसंहारमाह —

एतच्छास्त्रानुसारेण मारकान्निर्दिशेद् बुधः।
चन्द्रसूर्यौ विना सर्वे मारकाः परिकीर्तिताः॥
स्वदशायां स्वभुक्तौ च नराणां निधनं नहि।
क्वचिद्दशायामिच्छन्ति स्वभुक्तौ न कदाचन॥

अन्वयः — बुध एतत् शास्त्रानुसारेण मारकान् निर्दिशेत्। चन्द्र-सूर्यौ विना सर्वे ग्रहाः मारकाः परिकीर्तिताः। तत्र कारकाः ग्रहाः स्वदशायां स्वभुक्तौ च नराणां निधनं नहि दिशन्ति। क्वचित् पापफलग्रहदशायां इच्छन्ति, स्वभुक्तौ कदाचन न इच्छन्ति (घ्नन्ति) इत्यर्थः।

क्षेमङ्करी — इस शास्त्र के अनुसार मारक का विनिश्चय करना चाहिए वहाँ चन्द्रमा और सूर्य को छोड़कर सभी मारक होते हैं। मारक ग्रह अपनी दशा और अपनी अन्तर्दशा में मनुष्यों को नहीं मारते हैं। लेकिन अपनी दशा में किसी अन्य अन्तर्दशा में मारता है। अपनी अन्तर्दशा में कथमपि नहीं मारता है।

डॉ० सुधीर कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना,
पूर्णियाँ।

## उपशास्त्री

12.09.20
1

कुम्भलग्नजातानां मारकादिविचारमाह —

जीवचन्द्रकुजाः पापा एको दैत्यगुरुः शुभः ।
राजयोगकरौ भौमः कविश्चैवं बृहस्पतिः ॥
निहन्ता हनन्ति भौमाद्या मारकत्वेन लक्षिताः ।
एवमेव फलान्यूह्यान्येवं हि घटजन्मनः ॥

अन्वयः — कुम्भलग्नोद्भवानां जातानां जीव-चन्द्र-कुजाः पापाः सन्ति तत्र एको दैत्यगुरुः (शुक्रः) शुभः अस्ति । भौमः कविश्च एव राजयोगकरौ स्तः । बृहस्पतिः निहन्ता अस्ति । तत्र भौमाद्या मारकत्वेन लक्षिताः सति हनन्ति । एवं घटजन्मन एवफलानि हि ऊह्यानि ।

क्षेमङ्करी — एतदनन्तर कुम्भ लग्न में जन्म लेने वालों का गुरु, चन्द्रमा और मंगल अशुभग्रह है। केवल एक दैत्यगुरु (शुक्र) शुभ है। मंगल और शुक्र निश्चय राजयोगकारक है। गुरु मारक नहीं होता, भौमादि पाप ग्रह (मंगल, चन्द्रमा, बृहस्पति) मारक लक्षण युक्त होने से मारक होते हैं।

मीनलग्नजातानां मारकादिविचारमाह —

मन्दशुक्रांशुमत्सौम्याः पापाः भौमविधू शुभौ ।
महीसुतगुरु योगकारकौ नैव भूसुतः ॥
मारको मारकाभिज्ञौ मन्दज्ञौ हनन्ति पापिनौ ।
इत्यूह्यानि बुधैस्तत्र फलानि झषजन्मनः ॥

अन्वयः — अथ झष लग्नोद्भवानां शनि शुक्र अंशुमत् सौम्याः पापाः सन्ति । भौम विधू शुभौ स्तः । महीसुत गुरु योगकारकौ स्तः । तत्र भूसुतः मारकः अपि नैव मारको भवति । मन्दज्ञौ पापिनौ मारकाभिज्ञौ हनन्ति । इति झषजन्मनः फलानि तत्र बुधैः ऊह्यानि ।

P.T.O